aglasem.com

FOR KARNATAKA CLASS 11 PREPARATION

Karnataka 1st PUC Model Question Paper 2027 for Sanskrit (Paper 2)

EXAM	YEAR	TYPE	SUBJECT
Karnataka Class 11	2027	Sample Paper	Sanskrit

GOVT. OF KARNATAKA

Department of School Education (Pre-University)

MODEL QUESTION PAPER 02 - 2026-27

Class: I PUC | Subject: SANSKRIT (09) | Max. Marks: 80

Time: 3.00 Hours | No. of Questions: 46

सूचनाः ।

1) **अस्यां प्रश्नपत्रिकायां** A, B, C, D **इति चत्वारः विभागाः सन्ति ।**

2) **एकैकस्यापि विभागस्य प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।**

3) 'A' **विभागस्य प्रश्नानां सर्वप्रथमं लिखितम् उत्तरमेव मौल्यमापनार्थं परिगण्यते ।**

PART-A

I. अधो निर्दिष्टानां प्रश्नानां समीचीनं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरं लिखत । 10 X 01 =10

1) एतया विद्यया अक्षरम् अधिगम्यते ।

अ) अपराविद्यया **आ)** युद्धविद्यया

इ) द्यूतविद्यया **ई)** पराविद्यया

2) वासवः केषां राजा ?

अ) जनानाम् **आ)** राक्षसानाम्

इ) देवानाम् **ई)** नागानाम्

3) शीघ्रगः कः ?

अ) शशकः **आ)** चटकः

इ) वानरः **ई)** बकः

aglasem.com For more Question Papers, Sample Papers, Notes & Syllabus visit aglasem.com

4) भीमसेनः कं स्वभ्राता इति वदति ?

अ) हनूमन्तम्
आ) अङ्गदम्
इ) अर्जुनम्
ई) सुग्रीवम्

5) मारीचः कस्य शापात् कौणपताम् अवाप ?

अ) विश्वामित्रस्य
आ) वसिष्ठस्य
इ) व्यासस्य
ई) कुम्भसम्भवस्य

6) उदाहरणवस्तुषु अग्रण्यः कः ?

अ) अगस्त्यः
आ) अङ्गिरस:
इ) वसिष्ठः
ई) भारद्वाजः

7) ज्यौतिषिकस्य पत्नी कुत्र स्थित्वा तं प्रतीक्षते स्म ?

अ) द्वारे
आ) मार्गे
इ) प्रकोष्ठे
ई) अङ्गणे

8) "सान्तःपुरः शरणागतोऽस्मि " इति पाठानुसारेण चतुःसागरपर्यन्ता का ?

अ) पृथिवी
आ) वेणी
इ) नदी
ई) नगरी

9) केषां मन: निश्चलम् ?

अ) मूर्खाणाम्
आ) धीराणाम्
इ) भीरूणाम्
ई) राक्षसानाम्

10) वैशालीपुर्याः राजा कः ?

अ) अभिजित्
आ) सर्वजित्
इ) इन्द्रजित्
ई) सेनजित्

aglasem.com For more Question Papers, Sample Papers, Notes & Syllabus visit aglasem.com

II. मञ्जूषातः सूक्तं पदं चित्वा रिक्तं स्थानं पूरयत । 01 X 05 = 05

11) i) धर्मज्ञः सत्यसन्धश्च _____ च हिते रतः ।

ii) बले पराक्रमे युद्धे _____ तव निग्रहे ।

iii) आश्रुतः श्रुतवृत्तेन तेन _____ ।

iv) _____ सललितं रुचिरं वहति ।

v) _____ अपेक्ष्यते सकलेष्वपि प्राणिषु ।

सुन्दप्रियावधः , दयैव , शक्तोऽहं , कल्याणम् , प्रजानां , हल्लीसकं

III. संयोजयत । 01 X 05 = 05

12)

क	**ख**
अ) अक्षरम्	i) नीलभुजङ्गमः
आ) अगस्त्यः	ii) गरीयसी
इ) मेना	iii) सुसूक्ष्मम्
ई) कालियः	iv) कुम्भसम्भवः
उ) आशा	v) कालिदासः
	vi) पर्वतराजः

PART - B

IV. द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत । (चतुर्णामेव)

04 X 02 = 08

13) ब्रह्मणः स्वरूपं वर्णयत ।

14) मार्जारस्य धर्मोपदेशनां श्रुत्वा शशकः कपिञ्जलं किमाह ?

15) भीमसेनः किमर्थं हनूमत: क्षमां याचति ?

16) प्राञ्जलिः भूधरेश्वरः सप्तर्षीन् किमुवाच ?

17) सुभाषिते सन्तोष एव पुरुषस्य परं निदानम् इति कथं निरूपितम् ?

aglasem.com For more Question Papers, Sample Papers, Notes & Syllabus visit aglasem.com

18) अल्लमप्रभुः सम्बन्धस्य वैचित्र्यं कथं वर्णयति ?

19) श्री महोदयस्य शिष्यवात्सल्यम् ।

V. पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत । (चतुर्णामेव) 04 X 02 = 08

20) यद्भूतयोनिं परिपश्यन्ति धीराः ।

21) ननु स्वभावतोऽस्माकं शत्रुभूतोऽयमस्ति ।

22) तन्नाहं भक्षयिष्यामि ।

23) निर्यातु रामः सह लक्ष्मणेन ।

24) इदानीं तु निद्रासमयः ।

25) चिह्नितं तव मूर्धनि ।

26) प्रदर्श्यतां तावत् स्वविषयकं प्रामाण्यम् ।

PART - C

VI. पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नडभाषया आङ्ग्लभाषया वा कुरुत । (द्वयोरेव)

02 X 03 = 06

27) रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः ।
राजा सर्वस्य लोकस्य देवानामिव वासवः ॥

28) भ्राता मम गुणश्लाघ्यो बुद्धिसत्त्वबलान्वितः ।
रामायणेऽतिविख्यातः शूरो वानरपुङ्गवः ॥

29) यावन्त्येतानि भूतानि स्थावराणि चराणि च ।
मातरं कल्पयन्त्वेनामीशो हि जगतः पिता ॥

30) चलन्ति गिरयः कामं युगान्तपवनाहताः ।
कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः ॥

aglasem.com For more Question Papers, Sample Papers, Notes & Syllabus visit aglasem.com Page 4 of 7

VII. दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत । (चतुर्णामेव)

04 X 05 = 20

31) श्रीरामः कथम् एकः आदर्शपुरुषः इति साधयत ।

32) "मार्जार: शशकपिञ्जलौ कथं व्यापादयति ?" इति वर्णयत ।

33) सुन्दवधूवृत्तान्तं (ताटकावृत्तान्तं) "महर्षिवचनपालनम्" इति पाठाधारेण विशदीकुरुत ।

34) समयप्रज्ञाम् उपयुज्य ज्यौतिषिकः गुरुनायकं कथं वञ्चयति इति विवृणुत ।

35) दामोदरस्य पात्रचित्रणं पाठानुसारेण कुरुत ।

36) देवव्रत-चन्द्रधरयोः मैत्रीं वर्णयत ।

37) भारते गणितशास्त्रं खगोलशास्त्रं च कथम् उन्नतिं नीते इति विशदयत ।

PART - D

VIII. यथा निर्देशं कुरुत । (पञ्चानामेव) 05 X 02 = 10

38) **सन्धि विभजत । (द्वयोरेव)**

अ) चैव

आ) नाविजित्य

इ) पुनरपि

39) **सन्धि योजयत । (द्वयोरेव)**

अ) ह + उवाच

आ) तत् + इच्छामि

इ) पिशित + अशनः

40) **विग्रहवाक्यं लिखत । (द्वयोरेव)**

अ) धर्मोपदेशकः

आ) दंष्ट्राक्रकचेन

इ) प्रतिष्ठापितधृतिः

aglasem.com For more Question Papers, Sample Papers, Notes & Syllabus visit aglasem.com

41) **समस्तपदं लिखत । (द्वयोरेव)**

अ) वीराणां पानम्

आ) यादसां निधिः

इ) वट इति वृक्षः

42) **पदपरिचयं कुरुत । (द्वयोरेव)**

अ) अधिगम्य

आ) विधातुम्

इ) मुक्त्वा

43) **समानार्थकपदं लिखत । (द्वयोरेव)**

अ) शिवः

आ) वासवः

इ) मार्जारः

44) **विरुद्धपदं लिखत । (द्वयोरेव)**

अ) सर्वज्ञः

आ) अन्धकारः

इ) सुखम्

IX. 45) **संस्कृतभाषया अनुवदत ।** 04 X 01 = 04

i) ಗಂಗಾನದಿಯು ಹಿಮಾಲಯ ಪರ್ವತದಿಂದ ಹರಿಯುತ್ತದೆ.

The river Ganga flows from Himalayan mountains.

ii) ಮರದಿಂದ ಹಣ್ಣು ಕೆಳಗೆ ಬೀಳುತ್ತದೆ.

A fruit falls from the tree.

iii) ವನ್ಯ ಮೃಗಗಳು ಕಾಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತವೆ.

The wild animals live in the forest.

aglasem.com For more Question Papers, Sample Papers, Notes & Syllabus visit aglasem.com

iv) ನಾಳೆ ನನ್ನ ತಂದೆಯು ನಗರಕ್ಕೆ ಬರುವರು.

My father is coming to the city tomorrow.

X. परिच्छेदमिमं पठित्वा प्रश्नानाम् उत्तराणि लिखत । 01 X 04 = 04

46) चाणक्यः मगधदेशस्य चन्द्रगुप्तमौर्यस्य मन्त्री आसीत् । सः एकस्मिन् उटजे वसति स्म । एकदा राजा दरिद्रेभ्यः दातुं कम्बलान् दत्तवान् । केचन चोराः कम्बलान् चोरयितुं चाणक्यस्य उटजं आगताः । तदा शीतकालः आसीत्। तथापि चाणक्यः कम्बलं विना एव भूमौ सुप्तः आसीत् । आश्चर्यचकिताः चोराः चाणक्यं प्रबोधितवन्तः । ते अपृच्छन् अत्र तु अनेके कम्बलाः सन्ति । शैत्यमपि अस्ति । तथापि त्वं किमर्थं भूमौ कम्बलं विना शयनं करोषि ? इति । तदा चाणक्यः अवदत् - दरिद्रेभ्यः दातुं राजा दत्तवान् एतान् कम्बलान् । एते मम कृते न । एतत् श्रुत्वा चोराः अपि सज्जनाः अभवन् । "अन्येषां द्रव्यस्य उपयोगः अधर्मः" इति चाणक्यस्य सन्देशः ।

प्रश्नाः-

i) चाणक्यः कस्य मन्त्री असीत् ?

ii) चोराः किमर्थं चाणक्यस्य उटजम् आगताः ?

iii) चाणक्यः चोरान् किम् अवदत् ?

iv) चाणक्यस्य सन्देशः कः ?

---

aglasem.com For more Question Papers, Sample Papers, Notes & Syllabus visit aglasem.com